# मन्त्रपुष्पम्

## mantrapuṣpam

ॐ योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

om yo'pāṁ puṣpaṁ veda| puṣpavān prajāvān paśumān bhavati| candramā vā apāṁ puṣpam | puṣpavān prajāvān paśumān bhavati| ya evaṁ veda| yo'pāmāyatanaṁ veda| āyatanavān bhavati|

अग्निर्वा अपामायतनम् । आयतनवान् भवति । योऽग्नेरायतनं वेद । आयतनवान् भवति । आपो वा अग्नेरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

agnirvā apāmāyatanam| āyatanavān bhavati| yo'gnerāyatanaṁ veda| āyatanavān bhavati| āpo vā agnerāyatanam| āyatanavān bhavati| ya evaṁ veda| yo'pāmāyatanaṁ veda| āyatanavān bhavati|

वायुर्वा अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति ॥ आपो वै वायोरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥

vāyurvā apāmāyatanam| āyatanavān bhavati| yo vāyorāyatanaṁ veda| āyatanavān bhavati|| āpo vai vāyorāyatanam| āyatanavānbhavati| ya evaṁ veda| yo'pāmāyatanaṁ veda| āyatanavān bhavati||

radiosai

असौ वै तपन्नपामायतनम्। आयतनवान् भवति। योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति। आपो वा अमुष्य तपत आयतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

asau vai tapannapāmāyatanam| āyatanavān bhavati| yo'muṣya tapata āyatanaṁ veda| āyatanavān bhavati| āpo vā amuṣya tapata āyatanam| āyatanavān bhavati| ya evaṁ veda| yo'pāmāyatanaṁ veda| āyatanavān bhavati||

चन्द्रमा वा अपामायतनम्। आयतनवान् भवति। यश्चन्द्रमस आयतनं वेद। आयतनवान् भवति। आपो वै चन्द्रमस आयतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

candramā vā apāmāyatanam| āyatanavān bhavati| yaścandramasa āyatanaṁ veda| āyatanavān bhavati| āpo vai candramasa āyatanam| āyatanavān bhavati| ya evaṁ veda| yo'pāmāyatanaṁ veda| āyatanavān bhavati||

नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति। यो नक्षत्राणामायतनं वेद। आयतनवान् भवति। आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

nakṣatrāṇi vā apāmāyatanam| āyatanavān bhavati| yo nakṣatrāṇāmāyatanaṁ veda| āyatanavān bhavati| āpo vai nakṣatrāṇāmāyatanam| āyatanavān bhavati| ya evaṁ veda| yo'pāmāyatanaṁ veda| āyatanavān bhavati||

पर्जन्यो वा अपामायतनम् । आयतनवान् भवति । यः पर्जन्यस्यायतनं वेद । आयतनवान् भवति । आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥

parjanyo vā apāmāyatanam| āyatanavān bhavati| yaḥ parjanyasyāyatanaṁ veda| āyatanavān bhavati| āpo vai parjanyasyā''yatanam| āyatanavān bhavati| ya evaṁ veda| yo'pāmāyatanaṁ veda| āyatanavān bhavati||

संवत्सरो वा अपामायतनम् । आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद । आयतनवान् भवति । आपो वै संवत्सरस्यायतनम् । आयतनवान् भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥

saṁvatsaro vā apāmāyatanam| āyatanavān bhavati| yassaṁvatsarasyāyatanaṁ veda| āyatanavān bhavati| āpo vai saṁvatsarasyāyatanam| āyatanavān bhavati| ya evaṁ veda| yo'psu nāvaṁ pratiṣṭhitāṁ veda| pratyeva tiṣṭhati||

ॐ राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ॥

om rājādhirājāya prasahyasāhine| namo vayaṁ vaiśravaṇāya kurmahe| sa me kāmānkāmakāmāya mahyam| kāmeśvaro vaiśravaṇo dadātu| kuberāya vaiśravaṇāya| mahārājāya namaḥ||

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ||